# वार्षिकपरीक्षा, 2018-19

## संस्कृतम्

**अवधिः - होरात्रयम्** **कक्षा - अष्टमी** **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 22.2.2019 (शुक्रवासरः)**

**निर्देशाः –**

- सर्वे प्रश्नाः समाधेयाः ।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- सर्वेषां प्रश्नानाम् उत्तराणि क्रमेणैव संस्कृतभाषायामेव लेखनीयानि ।
- रिक्तस्थानयुक्तानां सर्वेषां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत ।

## खण्डः - क (अपठितावबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । सहसा एकं क्रन्दन-ध्वनिं श्रुत्वा सः इतस्ततः अपश्यत् । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत् । एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम् । सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अंके अधारयत् । अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत् - ''सिद्धार्थ ! एषः मम हंसः । अहं बाणेन एनं निपातयत् । अतः मह्यं देहि ।'' सिद्धार्थः दृढ़तया अवदत् - ''अहं न दास्यामि । अहम् अस्य रक्षकः अस्मि ।'' तदा तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत् - ''यस्य पार्श्वे हंसः आगमिष्यति तस्यैय भविष्यति ।'' हंसः सिद्धार्थस्य समीपं गतवान् । सत्यमिदम् - 'भक्षकात् रक्षकः श्रेयान् ।'

**क) एकपदेन उत्तरत -** **(½×4=2)**

अ) सिद्धार्थः किमर्थम् उपवनं गतः ?

ब) कः भूमौ पतितः आसीत् ?

स) हंसः कस्य समीपम् गतवान् ?

द) भक्षकात् कः श्रेयान् ?

**ख) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

अ) सिद्धार्थः किं कृत्वा हंसम् अंके अधारयत् ?

ब) सर्वं वृत्तान्तम् श्रुत्वा राजा किम् आदिशत् ?

**ग) गद्यांशस्य उचितमेकं शीर्षकं लिखत ।** **(2)**

**घ) निर्देशानुसारं उत्तरत -** **(¼×4=2)**

अ) 'उद्यानम्' इति पदस्य पर्यायपदं अनुच्छेदात् चित्वा लिखत ।

ब) 'सः उच्चैः अवदत् ।' अत्र क्रियापदं किम् ?

स) 'चित्तं व्याकुलं' अत्र विशेषणं पदं किम् ?

द) 'भक्षकः' इति पदस्य कः विपर्ययः अनुच्छेदे आगतः ?

## खण्डः - ख (रचनात्मककार्यम् - 20 अंकाः)

**प्र.2 अधोलिखितम् चित्रं मञ्जूषायाः सहायतया पञ्चवाक्येषु वर्णयत -** **(2×5=10)**

| मञ्जूषा | नगरस्य, बसचालकः, उत्कोचम्, बसयानम्, अत्र, अस्ति, अपि, एतत् चित्रम्, यच्छति, द्विचक्रिका, जनाः, विवादम्, कुर्वन्ति |
|---|---|



**प्र.3** **अधोलिखितं संवादं मञ्जूषाया: प्रदत्तशब्दै: पूरयत -** **(1×5=5)**

| मञ्जूषा | अस्ति, भजनम्, मया, त्वम्, गच्छसि |
|---|---|

दिनेश: - सुप्रभातम्, अधुना (1)................ किम् करोषि ?

संजय: - (2)................ स्व पाठ: स्मर्यते ।

दिनेश: - अद्य तु अवकाश: अस्ति किं भ्रमणाय न (3)................ ?

संजय: - श्व: मम संस्कृतस्य कक्षापरीक्षा (4)................ अतएव मया रूपाणि स्मर्यते ।

दिनेश: - किम् त्वम् ईश्वरस्य (5)................ अपि करोषि ?

संजय: - आम् मया ईश्वरस्य भजनम् नित्यम् क्रियते ।

**प्र.4** **स्वअध्ययनस्य प्रगते: विषये अग्रजं प्रति पत्रं पूरयत -** **(½×10=5)**

| मञ्जूषा | सादरं नमस्कार:, भवामि, भवदीय:, नियमेन, पाठानाम्, स्थानम्, अभ्यासम्, नवदेहली, स्वाध्ययनस्य, प्रतिदिनम् |
|---|---|

(1)................

दिनांक 22.02.2019

पूज्य भ्रात:

(2)................ ।

अत्र कुशलम् तत्र अस्तु । अहम् (3)................ प्रगतिविषये किंचित् लिखितुम् इच्छामि । अधुना मम शिक्षणम् तु (4)................ आरब्धम् । अहम् (5)................ प्रात: सार्धचतुर्वादने उत्तिष्ठामि । षड्वादनपर्यन्तम् पठितानाम् (6)................ आवृत्तिं करोमि । सार्धषड्वादने विद्यालयम् गमनाय तत्पर: (7)................ विद्यालयात् आगत्य अहम् सायंकाले गणितस्य (8)................ करोमि । अतएव अधुना गणिते मम दुर्बलता दूरीभूता । संस्कृतविषयेऽपि अहम् प्रथमम् (9)................ प्राप्तवान् । पितृभ्याम् मम प्रणामा: ।

(10)................ अनुज: ।

राजेश:

## खण्ड: - ग (अनुप्रयुक्तव्याकरणम् - 20 अंका:)

**प्र.5** **निर्देशानुसारम् शब्दरूपाणि लिखत -** **(1×4=4)**

क) 'अस्मद्' शब्दस्य तृतीया बहुवचने किं रूपं भविष्यति ?

अ) मया  ब) आवाम्  स) अस्माभि:

ख) 'युष्मद्' शब्दस्य सप्तमी एकवचने किं रूपं भविष्यति ?

अ) त्वयि  ब) युवयो:  स) त्वया

ग) 'किम्' (पुल्लिंग) शब्दस्य षष्ठी एकवचने किं रूपं भविष्यति ?

अ) कै:  ब) कान्  स) कस्य

घ) 'तत्' (स्त्रलिंग) शब्दस्य द्वितीया बहुवचने किं रूपं भविष्यति ?

अ) सा  ब) ता:  स) ते

**प्र.6 निर्देशानुसारं धातुरूपाणि लिखत -** **(1×4=4)**

क) 'पठ्' धातो: लोट्लकारे मध्यमपुरुष-एकवचने किं रूपं भविष्यति ?

अ) पठ ब) पठतु स) पठन्तु

ख) 'वद्' धातो: विधिलिङ्गलकारे उत्तमपुरुष-एकवचने किं रूपं भविष्यति ?

अ) वदेयम् ब) वदेम स) वदेताम्

ग) 'भू' धातो: विधिलिङ्गलकारे प्रथमपुरुष-बहुवचने किं रूपं भविष्यति ?

अ) भवेयु: ब) भव स) भवतु

घ) 'गम्' धातो: लोट्लकारे मध्यमपुरुष-द्विवचने किं रूपं भविष्यति ?

अ) गच्छन्तु ब) पठतम् स) गच्छतम्

**प्र.7 अधोलिखितेषु वाक्येषु रिक्तस्थानानि वाच्यानुसारं कोष्ठकात् उचितपदं चित्वा पूरयत -** **(1×4=4)**

क) स: पुस्तकानि .................... । (पठ्यते / पठति)

ख) .................... भोजनं खाद्यते । (लताभ्याम् / लता:)

ग) बाल: चन्द्रमसम् .................... । (पश्यति / दृश्यन्ते)

घ) मुनिना .................... स्मर्यते । (ईश: / ईशम्)

**प्र.8 कोष्ठकात् चित्वा उचित प्रकृति-प्रत्ययौ लिखत -** **(1×4=4)**

क) रामस्य स्वभावे <u>सरलता</u> आसीत् । (सर+लता / सरल + तल्)

ख) अहम् '<u>शक्तिमान्</u>' इति कार्यक्रमम् दूरदर्शने पश्यामि । (शक्ति+मतुप्/शक्ति+शानच्)

ग) मम <u>मातामही</u> मुंबईनगरे वसति । (मातामही+ङीप् / मातामह+ङीप्)

घ) रमा <u>चतुरा</u> बाला अस्ति । (चतुर+टाप् / चतुर् + ङीप्)

**प्र.9 अधोलिखितवाक्यानाम् संस्कृतेन अनुवादं कुरुत -** **(1×4=4)**

क) वे सब घर जाते हैं ।

ख) बालक खेलते हैं ।

ग) हम सब दौड़ते हैं ।

घ) वह पत्र लिखता है ।

## <u>खण्ड: - घ (पठितावबोधनम् - 30 अंका:)</u>

**प्र.10 गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

इयमस्ति महाराष्ट्रस्य प्रथमा महिला-पाठशाला । एका शिक्षिका गृहात् पुस्तकानि आदाय चलति । सा स्वविद्यालये कन्याभि: सविनोदम् आलपन्ती । तस्या: स्वकीयम् अध्ययनमपि सहैव प्रचलति । इयमेव महाराष्ट्रस्य प्रथमा महिला शिक्षिका सावित्रीबाई फुले नामधेया ।

जनवरी मासस्य तृतीये दिवसे 1831 तमे खिस्ताब्दे महाराष्ट्रस्य नायगांव-नाम्नि स्थाने सावित्री अजायत । तस्या: माता लक्ष्मीबाई पिता च खण्डोजी इति अभिहितौ ।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) महाराष्ट्रस्य प्रथमा महिला शिक्षिका का ?

ब) सावित्र्या: माता का आसीत् ?

**ख) पूर्णवाक्येन उत्तरत -** **(1)**

सावित्र्या: जन्म कुत्र अभवत् ?

**ग) निर्देशानुसारं उत्तरत -** **(1×2=2)**

अ) सन्धि विच्छेदं कुरुत - ''सहैव'' ।

ब) 'चलति' इति क्रियाया: कर्तृपदं किम् ?

**प्र.11 अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।

पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।

**क) एकपदेन उत्तरत -** **(1×2=2)**

अ) अस्य पद्यांशस्य रचयिता कः ?

ब) पृथिव्याः मानदण्डः इव कः स्थितः ?

**ख) पूर्णवाक्येन उत्तरत -** **(1)**

हिमालयः भारतस्य कस्यां दिशि वर्तते ?

**ग) यथानिर्देशम् उत्तरत -** **(1×2=2)**

**संधिविच्छेदं कुरुत -**

अ) पूर्वापरौ

ब) नगाधिराजः

**प्र.12 अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -** **(1×4=4)**

क) गजपरिमाणं कः धारयति ?

ख) उपवनस्य द्वारे कानि क्षिप्तानि सन्ति ?

ग) अस्माकं प्रयासः कस्य रक्षणे अपेक्षितः ?

घ) सूर्य कस्यां दिशायाम् उदेति ?

**प्र.13 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×4=4)**

क) तडागाः संसारसागराः कथ्यन्ते ।

ख) आर्यभटस्य वेधशाला पाटलिपुत्रे आसीत् ।

ग) पृथिव्याः मानदण्डः हिमालयः अस्ति ।

घ) अस्माकं देशे सप्त केन्द्रशासितप्रदेशाः सन्ति ।

**प्र.14 मञ्जूषातः पर्यायपदं चित्वा लिखत -** **(1×4=4)**

**मञ्जूषा -** पर्वतः, कायरः, अधुना, सूर्यः

क) साम्प्रतम् -

ख) कातरः -

ग) दिवाकरः -

घ) नगः -

**प्र.15 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×4=4)**

**मञ्जूषा -** सहसा, एतानि, चला, निवसन्ति

क) सूर्यः अचलः पृथिवी च .................।

ख) ................ बालिका तत्र अहसत् ।

ग) अत्र बहवः जनजातीयाः .................।

घ) उद्याने ................ पुष्पाणि विकसितानि सन्ति ।

**प्र.16 अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -** **(1×4=4)**

क) नापितैः - ........... ...........

ख) कस्य - ........... ...........

ग) मृगात् - ........... ...........

घ) पृथिव्याम् - ........... ...........